श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीव्यासराजयति विरचितम्

# ॥ श्री श्रीनिवासस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासस्तोत्रम् ॥

प्रातः स्मरामि रमया सह वेङ्कटेशं
मन्दस्मितं मुखसरोरुहकान्तिरम्यम्।
माणिक्यकान्तिविलसन्मुकुटोर्ध्वपुण्ड्रं
पद्माक्षलक्षमणिकुण्डलमण्डिताङ्गम्॥ 1 ॥

प्रातर्भजामि कररम्यसुशङ्खचक्रं
भक्ताभयप्रदकटिस्थलदत्तपाणिम्।
श्रीवत्सकौस्तुभलसन्मणिकाञ्चनाड्यं
पीताम्बरं मदनकोटिसुमोहनाङ्गम्॥ 2 ॥

प्रातर्नमामि परमात्मपदारविन्दम्
आनन्दसान्द्रनिलयं मणिनूपुराड्यम्।
एतत् समस्तजगतामिति दर्शयन्तं
वैकुण्ठमत्र भजतां करपल्लवेन॥ 3 ॥

व्यासराजयतिप्रोक्तं श्लोकत्रयमिदं शुभम्।
प्रातः काले पठेद्यस्तु पापेभ्यो मुच्यते नरः॥ 4 ॥

॥ श्री श्रीनिवासस्तोत्रं समाप्तम्॥